**द्विवेद** त्रि० द्वौ वेदावधीते वेद वा अण् तस्य लुक् । द्विवेदा-

**द्विवेशरा** स्त्री द्वौ वेशौ यानस्थानरूपौ राति ददाति रा–क । लघुरथे नरवाह्यायां गन्त्र्यां हारा० ।

**द्विव्रण** पु० द्विविधो व्रणः शाक०त० । सुश्रुतोक्ते शारीरे आगन्तुके च द्विविधे व्रणे । तस्येदम् छ । द्विव्रणीय तदधिकारेण चिकित्सितादौ । द्विविधव्रणतन्त्रेदनिदानादि सुश्रुते दर्शितं यथा "अथातो द्विव्रणीयचिकित्सितं व्याख्यास्यामः । द्वौ व्रणौ भवतः शारीर आगन्तुश्चेति । तयोः शारीरः पवनपित्तकफशोणितसन्निपातनिमित्तः । आगन्तुरपि पुरुषपशुपक्षिव्यालसरीसृपप्रपतनपीडनप्रहाराग्निक्षारविषतीक्ष्णौषधशकलकपालशृङ्गचक्रेषुपरशुशक्तिकुन्ताद्यायुधाभिघातनिमित्तः । तत्र तुल्ये व्रणसामान्ये द्विकारणोत्थानप्रयोजनसामर्थ्याद्द्विव्रणीय इत्युच्यते । सर्वस्मिन्नेवागन्तु व्रणे तत्कालमेव क्षतोष्मणः प्रसृतस्योपशमार्थं पित्तवच्छीतक्रियावधारणविधिर्विशेषः सन्धानार्थञ्च मधुघृतप्रयोग इत्येतद्द्विकारणोत्थानप्रयोजनमुत्तरकालन्तु दोषोपप्लवविशेषाच्छारीरवत्प्रतीकारः । दोषोपप्लवविशेषः पुनः समासतः पञ्चदशप्रकारः प्रसरणसामर्थ्याद्यथोक्तो व्रणप्रश्नाधिकारे शुद्धत्वात् षोडशप्रकार इत्येके । तस्य लक्षणं द्विविधं सामान्यं वैशेषिकञ्च । तत्र सामान्यं रुक्, व्रण गात्रविचूर्णने व्रणतीति व्रणः । विशेषलक्षणं पुनर्वातादिलिङ्गविशेषः । तत्र श्यावारुणाभस्तनुः शीतपिच्छिलाल्पस्रावी रूक्षश्चटचटायनशीलः स्फुरणायामतोदभेदवेदनाबहुलो निर्मांसश्चेति वातात् । क्षिप्रजः पीतनीलाभः किंशुकोदकाभोष्णस्रावी दाहपाकरागविकारो पीतपिडकाजुष्टश्चेति पित्तात् । प्रततचण्डकण्डूबहुलः स्थूलौष्ठः स्तब्धसिरास्नायुजालाततः कठिनः पाण्डववभासो मन्दवेदनः शुक्लशीतसान्द्रपिच्छिलास्रावी गुरुश्चेति कफात् । प्रवालदलनिचयप्रकाशः कृष्णस्फोटपिडकाजालोपचितस्तुरङ्गस्थानगन्धः सवेदनो धूमायनशीलो रक्तस्रावी पित्तलिङ्गश्चेति रक्तात् । तोददाहधूमायनप्रायः पीतारुणाभस्तद्वर्णस्रावी चेति वातपित्ताभ्याम् । कण्डूयनशीलः सनिस्तोदो दारुणो रूक्षगुरुः शीतपिच्छिलस्रावी चेति वातश्लेष्मभ्याम् । गुरुः सदाह उष्णः पीतः पाण्डुस्रावी चेति पित्तश्लेष्मभ्याम् । रूक्षस्तनुस्तोदबहुलः सुप्त इव च रक्तारुणाभस्तद्वर्णस्रावी चेति वातशोणिताभ्याम् । घृतमण्डाभो मीनधावनतोयगन्धिर्मृदुर्विसर्प्युष्णकृष्णस्रावी चेति पित्तशोणिताभ्याम् । रक्तो गुरुः पिच्छिलः कण्डूप्रायः स्थिरः सरक्तपाण्डुस्रावी चेति श्लेष्मशोणिताभ्याम् । स्फुरणतोददाहधूमायनप्रायः पीततनुरक्तस्रावी चेति वातपित्तशोणितेभ्यः । कण्डूस्फुरणचुमुचुमायनप्रायः पाण्डुघनरक्तस्रावी चेति वातपित्तश्लेष्मशोणितेभ्यः । दाहपाकरागकण्डूप्रायः पाण्डुघनरक्तस्रावी चेति श्लेष्मपित्तशोणितेभ्यः । त्रिविधवर्णवेदनास्रावविशेषोपेतः पवनपित्तकफेभ्यः । निर्दहननिर्मथनस्फुरणतोददाहपाकरागकण्डूस्वापबहुलो नानावर्णवेदनास्रावविशेषोपेतः पवनपित्तकफशोणितेभ्यः । जिह्वातलाभो मृदुः स्निग्धः श्लक्ष्णो विगतवेदनः सुव्यवस्थितो निरास्रावश्चेति शुद्धो व्रण इति ।"

**द्विशत** न० द्विगुणं शतम् । १शतद्वये । पूरणे ड । २तत्संख्यापूरणे त्रि० । ततस्तमप् द्विशततम तत्संख्यापूरणे त्रि० । द्विशतेन क्रीतम् कन् । "शताच्च ठन्यतावसमासे" पा० असमास इति विशेषणात् न ठन्यतौ द्विशतक । तत्क्रीते त्रि० द्वयोः शतयोः समाहारः ङीप् । ३द्विशती शतद्वयसमाहारे स्त्री ।

**द्विशतिका** द्वे द्वे शते ददाति "पादशतस्य संख्यादेर्वीप्सायां वुन्" पा० वुन् वुन्नन्तं स्त्रियामेव । द्विद्विशतदाने

**द्विशत्य** त्रि० द्विशतेन क्रीतम् "पणपादमाषशताद्यत्" पा० यत् । द्विशतेन क्रीते ।

**द्विशफ** पुंस्त्री द्वौ शफौ यस्य । छिन्नखुरे द्विखुरे पशुभेदे "गौरजो महिषः कृष्णः सूकरो गवयो रुरुः । द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तमः" भाग०३।१०।२ "कार्पासकीटजोर्णानां द्विशफैकशफस्य च" मनुः ।

**द्विशरीर** पु० द्वे चरस्थिरात्मके शरीरे अवयवे अस्य । चरस्थिरात्मके मिथुनकन्याधनुर्मीनरूपे राशिभेदे तेषां च प्रथमार्द्धस्य स्थिरसान्निध्यात् स्थिरात्मकत्वं चरमार्द्धस्य चरसान्निध्याच्चरत्वम् । द्वितनुद्विदेहादयोऽप्यत्र ।

**द्विशस्** अव्य० द्वौ द्वौ ददाति करोति वा शस् । एकक्रियया द्वयोर्व्याप्तौ । "द्विशः पात्राणि संसादयति" कात्या०श्रौ० २।३।६

**द्विशाण** त्रि० द्वाभ्यां शाणाभ्यां क्रीतम् । "द्वित्रिपूर्वादण् च" पा० ठञ् तस्यैव "अध्यर्द्धपूर्वेति" पा० लुक् । शाणद्वयक्रीते पक्षे अण् "परिमाणान्तस्यासंज्ञाशाणयोरिति" पा० पर्युदासादादिवृद्धिः । द्वैशाण पक्षे यत् । द्विशाण्य तत्रार्थे

**द्विशीर्ष** पु० द्वे शीर्षे अस्य । वह्नौ शब्दच० ।